: Sri Gurubhyo Namaha :

INTRODUCTION

What is the basic sustaining force of all the religions and philosophies of the world ? It is neither the principles propounded in the religious texts and philosophy nor the original Founders of religions, however great they may be, but the great Acharyas (Pontiffs) who gave more importance to the sincere practice of religion & realisation of truth in their own lives, setting an example to their disciples.

If the best of Indian Cultural traditions have survived to-day, it is due to the presence of such selfless enlightened Acharyas.

This practice of Vaidhika dharma & making people imbibe the spirit and follow the dharmic way of life is the cardinal mission of Sri Kanchi Kamakoti Peetha established by the greatest of Acharyas, Adi Sankara Bhagvat Pada. What a great dynasty of Acharyas unbroken in tradition throughout the age-from 509 B. C. to date-a period of nearly 2500 years !

This mall booklet 'PUNYA SLOKA MANJARI' contains slokas that have been taken out of the records available in the Kamakoti Mutt at Kanchi-There are 2 Short historical works authentic ones in Sanskrit

(1) JAGADGURU RATNAMALASTAVA of Sadhasiva Brahman;

(2) PUNYA SLOKA MANJARI of SARVAGNA SADA SIVENDRA SARASWATI, the 56th Guru of the Peetha.

These two authors have composed these works in a spirit of dedication and pious remembrance of the whole Guru-Parambara order, to which they have been priveleged to belong. Also included in this book-let are sloka by

(1) the 61st Guru of the Peetha giving details of Acharyas from 56th to 60th

(2) the late Polagam Sastra Ratnakara Rama Shastrigal detailing the greatness of Acharyas, from 61st to 68th c. e. upto the present Guru-His Holiness Chandra Shekarendra Saraswathi Swamigal.

To Know the history of Guru Parampara is important for an aspirant of spiritual uplift. For the benefit of his recitation, the text is given here.

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ श्रीः ॥

श्रीकामकोटिपीठाधिपश्रीमज्जगद्गुरुभ्यो नमः

॥ पुण्यश्लोकमञ्जरी ॥

मेधावी निगमपटुर्बहुश्रुतो वा
येनर्ते न कलयिता किलात्मतत्त्वम्
तन्नेत्रं तमसि च दिव्यदृष्टिदायि
श्रेयो नः प्रदिशतु धाम देशिकाख्यम् ॥१॥

अद्वैताचार्यपीठीमनु वसतिजुषामद्वयादेशभूम्ना-
माचार्याणां क्रमेणाद्वयसमयगुरोराच मे देशिकेन्द्रात् ।
आख्यास्येऽहं यथावद्विदितमवितथं धामनामादि तत्त-
द्ब्रह्मीभावीयवर्षाद्यनुगतमनघाः श्रूयतां तद्गुणज्ञैः ॥२॥

प्रायः प्रत्नैरेव चिता मया क्वचन नूतनैः ।
असौ विमृश्यतां श्लोकैः श्रीपुण्यश्लोकमंजरी ॥३॥

आचार्यः–१.

श्रीशंकरभगवत्पादाः

महेशांशाज्जातो मधुरमुपटिष्टाद्वयनयो
महामोहध्वान्तप्रशमनरविः षण्मतगुरुः ।
फले (३२) स्वस्मिन् स्वायुष्यपि शरचराब्देऽपि (२६२५)
च कलेः विलिल्ये रक्ताक्षिण्यधिवृषसितैकादशि परे ॥४॥

आचार्यं –२.

गौडसुरेश्वराचार्यपादाः

गौडः काश्मीरजन्मा कलितपरिचितिः पूर्वतन्त्रे कुमारात्
ब्रह्मण्यः सर्ववेदाः स्फुटशपथपथं श्रीमदाचार्ययोधी ।
संन्यासं प्रापितस्तं तदनु परिचरन् मोगभूमैकसीमा
तस्यादेशेन काञ्चयामवसदथ समास्सप्तति कामपीठे ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वर्षे शुद्धतरे (2695) कलेरथ भवे ज्येष्ठे सितद्वादशी-
रात्रौ चित्रितसर्वभूस्स यशसा श्रीमान् सुरेशः स्वयम् ।
श्रित्वा पुण्यरसां रसेन महता युञ्जन् लयाख्ये पथि
श्लक्ष्णश्रीशिवलिंगभूयमभजत्साक्षात्सतां पश्यताम् ॥

आचार्यः–३

सर्वज्ञात्मश्रीचरणाः

ताम्रारोधसि वर्धनात् समुदितस्संन्यासितस्सप्तमात्
प्रागेवात्मविवादहृष्टमनसा श्रीशंकरेणैव यः ।
तत्पीठे ससुरेश्वरं समनयद्वर्षांश्च यस्सप्तति
चत्वारिंशतमास्त सद्वयमसावब्दान् स्वयं तन्मठे ॥७॥

आचार्यप्रियपद्मपादचरणाम्भोजद्वयीसेवनात्
ऊढद्वारवतीमठाय मुनये ब्रह्मस्वरूपात्मने ।
श्रद्धाराद्धपदाय तत्त्वमतुलं चिन्मुद्रया निर्दिश-
न्नेवैक्यं समगान्निजेन महसा सर्वज्ञसंज्ञो मुनिः ॥८॥

कल्यब्दैस्सहयाग्निलोकनयने (2737) वर्षे नले माधवे
लिल्ये कृष्णचतुर्दशीमनु महस्याम्नायशैलान्तिके ।
ग्रन्थैर्यत्कलितैर्न्यदर्शि विदशं संक्षेपशारीरक-
प्रख्यैरद्वयसूत्रभाष्यगहनच्छन्नः पदार्थोच्चयः ॥९॥

आचार्यः–४

सत्यबोधेन्द्रसरस्वती

आम्रावतीतटजतांडवशर्मसूनुः
श्रीसत्यबोधनियमी फलिनीशनामा ।
श्रीभाष्यवार्तिककृदादरसंप्रपन्न-
सर्वज्ञसद्गुरुरवोढ धुरां गुरूणाम् ॥१०॥

अब्दान् यस्तत्त्वसंख्यानवसदथमठे शारदानाम्नि काञ्च्यां
दृप्यत्तौतातितार्हञ्जिनगुरुकणभुक्पश्यदंघ्र्यादितन्त्रम् ।
निर्यन्त्रं निर्मिमाणः पदकशतहतारातिकौतस्कुतोक्तिः
साक्षाच्छ्रीसत्यबोधोऽकृत सहबहुलाष्टम्यहे नन्दने स्वम् ११

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आचार्यः–५

ज्ञानानन्देन्द्रसरस्वती

जातो मंगलनाम्नि चोलविषये नागेशसंज्ञाद्द्विजा-
च्छ्रीज्ञानोत्तम इत्यवाप्तबिरुदो यस्तार्किकाग्रेसरः ।
ज्ञानानन्दमुनिस्त्रिषष्टिशरदः संमण्डच पीठीं गुरो-
स्सिद्धिं मन्मथमार्गशीर्षसितसप्तम्यामवापसुधीः ॥१२॥

आचार्यः–६

शुद्धानन्दमुनीन्द्रः

वेदारण्यजवैद्यभर्वुतनयः श्रीविश्वनाथाभिधः
ज्ञानानन्दमुनेरवाप्य नियमं काञ्चीपदे स्थापितः ।
शुद्धानन्दमुनीश्वरः स शरदः सैकामशीतिं धुरा-
माचार्यस्य वहन्नवाप च नलज्येष्ठाच्छषष्ठ्यां लयम् ॥१३॥

आचार्यः–७

भगवदानन्दज्ञानाचार्यः

आनन्दाराद्धगौरीनिरवधिकरुणालब्धसाहित्यविद्या-
सोहित्यस्सूर्यनारायणमखितनयश्चेरभूश्चिन्नयाख्यः ।
आनन्दज्ञाननामा भगवदुपपदस्संबभौ भाष्यकर्तुः
पीठे श्रीकामकोटयां प्रकटितपरमाचार्यभाष्यौघभाष्यः ॥१४॥

शुद्धानन्दमुनीन्द्रचन्द्रविमलालोकास्तचेतस्तमाः
विस्तार्याद्वयवर्त्म सप्ततिमथो नैकां समा गामवन ।
श्रीशैलान्तिकमासदन् पथिवशादानन्दसिद्धिं ययौ
सिद्धः क्रोधनराधकृष्णनवमीसंध्यामनु ब्रह्मवित् ॥१५॥

आचार्यः–८

कैवल्यानन्दयोगीन्द्रः

श्रीशैले (ली) यशिवय्यसूनुरदधात्तस्याज्ञया तत्वदं
मंगन्नार्य इति श्रुतः परमहो कैवल्ययोगिप्रथः ।
आरूढश्शिवराजयोगपदवीं तिष्ठंस्त्र्यशीतिं समाः
सिद्धोऽभूत्स च सर्वधारिमकरक्रान्तौ च सायाह्नि ॥१६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आचार्यः–९.

श्रीकृपाशंकरभगवत्पादाः

आंध्रेष्वात्मन्सोमयाजितनुभूर्गर्गान्वयो गंगया-
भिख्यःख्यापितषण्मतश्शिवहरिस्कन्दादिसेवाध्वनि ।
तन्त्राचारविदूरमेव नियमं सर्वत्र वेदोदितं
संस्थाप्याद्वयमप्यधात् द्वयकथादूरं कृपाशंकरः ॥१७॥

श्रीकैवल्यमुनीन्द्रशासनवशात् श्रीविश्वरूपाभिधं
शृंगेर्यां निहितं विधाय नियमान् लोके व्यवस्थाप्य च ।
चत्वारिंशतमेकयुक्तमभिमंडचाऽऽचार्यपीठीं दिशं
प्रस्थायैडबिडस्य सिद्धिमभजद्विध्ये कृपाशंकरः ॥१८॥

विभवे विभुरूर्जितः परोर्जे परमापानुतृतीयमद्वितीयः ।
परमं पदमात्मनीनमेकं परमानन्दमयं परापराख्यम् ॥१९॥

आचार्यः–१०

महेश्वरानन्दसुरेश्वर

महाबलीश्वरेश्वराच्युतोद्भवो महेश्वरा-
भिधः सुरेश्वरः परो नियम्य सर्वभूगुरोः ।
अवाप काञ्चिकामकोटिपीठधूर्वहक्रियां
ययौ स्वमक्षयेऽक्षयं शुचेश्शुचिस्स पर्वणि ॥२०॥

आचार्यः–११

शिवानन्दचिद्घनेन्द्रसरस्वती

कर्णाटोज्ज्वलसूनुरीश्वरवटुः श्रित्वा सुरेशं चिरात्
श्रीभाष्याधुपलभ्य तस्य च धुरामासाद्य पीठे वसन् ।
निन्ये तत्र शिवाः (45) समाश्शिव इव श्रेयोऽर्थिनां देहिनां
दातुं श्रेय उपागतोऽयमिव यः श्रीचिद्घनाख्यो बभौ ॥२१॥

प्राप्तं क्षीरगरित्तटाद्धरिरिति ख्यातं च वात्स्यायनं
पीठे स्वे विनिवेश्य दत्तनियमं संचार्य च प्रक्रियाम् ।
कल्यब्दे च विरोधिकृत्यनुतपं शुद्धे दशम्यामगात्
स्वं रूपं पररं सुधीशतनुतः श्रीचिद्घनश्चिद्घनम् ॥२२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आचार्यः–१२

श्रीचन्द्रशेखरेन्द्रयोगी

श्रीचिद्घनेन्द्रनियतश्शरदस्त्रिषष्टिं
श्रीकामकोटिमभिमंड्य ततश्च कंचित् ।
सच्चिद्घनाख्यमनुशिष्य वृतोऽपि शिष्यैः
श्रीचन्द्रशेखरगुरुस्सवपुस्तिरोऽधात् ॥२३॥

आनन्दमयमानन्दे आषाढ्याषाढपूर्वके ।
नवम्यामनवम्यं स्वं पदमापत् परात्परम् ॥२४॥

आचार्यः–१३

सच्चिद्घनेन्द्रः

सप्तत्रिंशदथो समास्समनुभूयाचार्यपीठीधुरां
श्रीविद्याघनमांध्रवर्णिनमधाच्छ्रीनायनाख्यं मठे ।
भ्राम्यन् बालवदन्तरे पुरवरस्याधूतवृत्तिः स्थिरः
श्रीसच्चिद्घनदेशिकस्समभजत्स्वान्तर्धिमन्वीश्वरम् ॥२५॥

सूनुः श्रीधरपण्डितस्य गरुडस्रोतस्विनीतीरभूः
शेषाख्यो गुरुचन्द्रशेखरमुनेश्शिष्यश्च सच्चिद्घनः ।
वर्षान् सप्ततिमेकवर्जमनुभूयाध्यात्मबुद्ध्या सुखं
देहान्ते शिवलिंगमध्यमविशत् कायाधिरोहेशितुः ॥२६॥

खरेऽखरप्रकृतिरघासहस्सहे परोरजाः परमपरे स पक्षके ।
अधादधिप्रतिपदनापदास्पदं परात्परं पदमशरीरमव्ययम् ॥२७॥

आचार्यः–१४

विद्याघनेन्द्रसरस्वती

निवेश्य गंगाधरगीष्पतिं पदे प्रविश्य कूटं तदगस्त्यचिह्नितम् ।
प्रमोटयन् मन्त्रत उग्रभैरवं निवेशनं स्वं तत एव क्लृप्तवान् ॥

श्रीमब्दापनसोमयाजितनयः श्रीनायनाभिख्यया
ख्यातः पूर्वमुदारमन्त्रविभवस्संयम्य सच्चिद्घनात् ।
आस्थायाप्यधिकामकोटि स शिवा (45) नब्दानगेऽगाल्लयं
धातौ शालि–मणीशिखीक्षण (239) सहे दर्शे च विद्याघनः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आचार्यः १५

गंगाधरगीष्पतिः

सूनुर्भद्रगिरेस्सुभद्र इति यः कञ्चचन्वयो द्वादशे
वर्षे संयममाश्रितोऽनुचरितादाचार्यविद्याधनात् ।
श्रीगंगाधरगीष्पतिस्स च चतुर्विंशे वयस्यात्मवित्
श्रीविद्याशिवयोर्निरन्तरधृतेराप्नोत्पदं शाश्वतम् ॥३०॥

सर्वधारिणि स सर्वधारकश्चित्रशक्तिरधिचैत्रमर्जुने ।
अर्जुनः स्वयशसाऽऽदिमे दिनेऽनादिधाम महसा जगाम ह ॥३१॥

आचार्यः–१६

श्रीमदुज्ज्वलमहायतिशंकरः

सूनुः शंकरकेशवस्य तपतीतीरोद्भवो नैष्ठिकः
श्रीमानच्युतकेशवः श्रितपदे वञ्चीश्वरे गीष्पतेः ।
आदेशात् कृतसंयमश्च विमतानामूलमुन्मूलय-
न्नाकाश्मीरमगान्महायतिरिति ख्यात्योज्ज्वलश्शंकरः ॥३२॥

अष्टत्रिंशदथातिवाह्य शरदः पीठे जगद्देशिक-
स्यासीद्विग्रसवाधिवह्निषु (3468) कलेर्यात्स्वक्षयेऽच्छे वृषे ।
अष्टम्यामपहर्षशोकमजरं ब्रह्मैव यश्शाश्वतं
काश्मीरेषु कलापुरे यदधुनाऽप्याख्यायतेऽस्याख्यया ॥

आचार्यः–१७

सदाशिवबालगुरुः

विप्राच्छ्रीदेवमिश्रादजनि जनित एवाप्तविद्याप्रकाशः
संस्कारैः प्राक्तनैर्यः समगिरत गिरं सर्वमात्मेति सत्यम् ।
तन्नो मृष्यद्भि(रर्थाज्जिन)रर्हज्जिनयुगभिजनैः पातितस्सिंधुवेण्यां
त्रातः प्रेम्णैव सिध्वाऽप्यविलयममुया पद्मपत्रे निवेश्य ॥३४॥

सूनुस्सोऽयं तपोभिस्तव मुदितधिया दीयतेऽद्येति वाचा
सार्धं दत्तो द्विजाय स्थिरनियमयुजे यस्तयैवोह्यमानः ।
पुष्टस्तेनाथ पुष्पाभिधपुरजनुषा भूरिवस्वाह्वयेन
त्रात्रा पित्रोपनीतस्समयमयमधादद्वयं निर्द्वयत्वे ॥३५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आचार्यमुज्ज्वलमहायतिशंकरार्य-
माराध्य संयममवाप्य तदाज्ञयैव ।
श्रीमान् सदाशिवगुरुर्व्यधिताब्धियात्रां
सान्दोलिकं सुविहिताश्रमवर्णधर्मः ॥३६॥

नित्यं ब्रह्मसहस्रपोषणपरस्सर्वत्र भाष्यं गुरोः
संचार्यं द्विविवर्जितान् सनियमं वारांश्च पञ्चाशतः ।
अध्यास्याष्ट जगद्गुरोरधिमठं वर्षान् समाधिस्थलीं
जीवन्नेव सदाशिवस्समविशत् कृत्वा सुरेन्द्रं पदे ॥३७॥

भवे भवाकृतिस्सोऽच्छे ज्येष्ठे ज्येष्ठस्तपस्विनाम् ।
दशम्यामाप दशमीं सिद्धिं सिद्धस्सदाशिवः ॥३८॥

आचार्य.-१८

सुरेन्द्रयोगितिलकः

दुर्दीर्दिवि समभिभूय तथाऽस्य साह्या-
सक्तं च जीवमपवार्य सधैर्यमुक्त्या ।
संपूजितस्सदसि राजसुरेन्द्रमुख्यै-
र्योगी सुरेन्द्रनियमी युयुजे पदे स्वे ॥३९॥

महाराष्ट्रस्सर्वैरपि च विनुतो माधुर इति
प्रपन्नस्संन्यासं रसवसुजलध्यग्निषु (3486) कलेः ।
दशैवाध्युष्याब्दानधिमठमयं योगितिलकः
सुरेन्द्रः स्वं मार्गं प्रतिपदि सिते प्राप निलयम् ॥४०॥

आचार्य -१९

मार्तण्डश्रीविद्याधनः

श्रीकण्ठोऽयमुमेशशंकरसुतः शिवत्री वयस्यष्टमे
निर्हन्तुं गदमन्वहं कृतनमस्साहस्रमर्कं भजन् ।
श्रीविद्याजपतश्च नीरुजतनुर्जातस्तथाष्टादशे
संन्यस्यन् स सुरेन्द्रदेशिकपदं प्रापत् प्रशान्तान्तरः ॥४१॥

मौनी तपस्स्ववशमृत्युरधिस्वपीठ-
मब्दांस्त्रयोदश विहृत्य च शंकरेन्द्रम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निक्षिप्य दत्तगुरुवाचमलब्ध सिद्धिं
सद्धेविलम्बिनि तथाह्नि महानवम्याम् ॥४२॥

आचार्यः–२०

अर्भकशंकरः

जातः खल्वाटवीराद्गणककुलमणेस्साधुविद्यावतीतो
मूको मूकार्भनामा भुवनगुरुपदाम्भोजरेणोर्महिम्ना ।
व्यक्तप्रोढोक्तिराप्त्वोपनयनमखिलाम्नायजातं च तातात्
गृह्णन् संन्यासमासीत् परमधिजगदाचार्यपीठं स धीरः ॥४३॥

श्रीशंकरेन्द्रः श्रितमातृगुप्त-
माधाय वर्णाश्रमधर्मपालम् ।
सैकोनषष्टित्रिशते (359) शकेऽब्दे
सिद्धिं गतः श्रावणपूर्णिमायाम् ॥४४॥

आचार्यः–२१

सार्वभौमगुरुचन्द्रचूडेन्द्रः

अर्चाचन्दनपेषणाद्भगवतः श्रीशंकरेन्द्रार्चित-
स्यारूढः पदवीं कवेरनुसृतेर्षस्य भूत्वा नृपः ।
काश्मीरेषु विरज्य विक्रममृतौ गृह्णन् गुरोः प्राक्तनात्
संन्यासं स हि कोंकणाच्युतसुतः श्रीचन्द्रचूडोऽभवत् ॥४५॥

अब्दान् देवनदीतटे दश नयन्नाचार्यभूतो भुवो
धन्वन्तर्यवतारमार्यमधुरं निक्षिप्य पीठे निजे ।
दत्वाऽस्मै परिपूर्णबोधबिरुदं भेजे व्यये चाव्ययं
धाम स्वं जननाष्टमीनिशि हरेः श्रीचन्द्रचूडाश्रमी ॥४६॥

आचार्यः–२२

परिपूर्णबोधेन्द्रः

पुत्रो रमेशमखिनो मधुरोऽगदंकृत्
ग्रावाभिलापक इति प्रथितश्च मन्त्रे ।
श्रीशारदामठगुरुः परिपूर्णबोधो
रौद्रचूर्जशुक्लनवमीमनु सिद्धिमापत् ॥४७॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आचार्यः–२३

सच्चित्सुखेन्द्रः

श्रीचिक्काकुलसोमनार्यतनयः सोऽयं गिरीशः पुरा
संन्यस्तः परिपूर्णबोधगुरुणा सच्चित्सुखः षण्मुखम् ।
ध्यायन् कालविदं सुदूरमुदधौ प्रोष्यार्यभट्टाभिधं
प्रत्यावृत्तमधादथास्तिकमनुष्ठाप्योदितं निष्क्रयम् ॥४८॥

चित्सुखं विनिवेश्य स्वे पदे सच्चित्सुखः सिते ।
खरे खरांशौ वृषगे सप्तम्यां सिद्धिमाप सः ॥४९॥

आचार्यं २४:–

चित्सुखेन्द्रः

सच्चित्सुखाच्छिव इति प्रथितोऽयमादा-
वादाय शासनमवर्तत कोंकणेषु ।
आचार्य इत्यभिधया परमार्यरक्षा-
माधान्नतु क्वचिदगात् पदतः पदं सः ॥५०॥

अपराभवोऽपि च पराभवे सितोऽ-
प्यनभस्यपीह स नभस्यथासिते ।
प्रशमी जगाम दशमीं च सन्नसौ
नवमीदिनेऽभिनवमीश्वराद्वयम् ॥५१॥

आचार्यं:२५

सिद्धगुरुसच्चिदानन्दघनः

श्रीमुष्णकृष्णतनयश्शिवसाम्बनामा
यस्त्रिःप्रदक्षिणितपुण्यमहिर्महात्मा ।
श्रीचित्सुखेन्द्रयमिनः श्रितशिष्यभावः
श्रीशारदामठविभुस्समभूत्स शान्तः ॥५२॥

यदीयवृत्तं निबबन्ध मंथो निबन्धने सिद्धजयाभिधाने ।
स विंशतिं सैकसमाः स्वपीठे निषद्य नित्यत्वमवाप सद्यः ॥५३॥

अधिसप्ततिके चतुश्शिरस्के स चिदानन्दघनस्स सन् शकाब्दे ।
प्रभवे प्रभवन् शुचिश्च शुच्योः प्रथमायां पृथुलिंगतामवापत् ।५४।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आचार्यः–२६

प्रज्ञाघनेन्द्रसरस्वती

प्रभाकरस्यात्मभवः पिनाकिनीतटीभवश्शोणगिरिर्जगद्गुरुः ।
स्वभानुवैशाखसिताष्टमीनिशि प्रज्ञाघनः प्राप परं पदं मुदा ।५५।

आचार्यः–२७

चिद्विलासेन्द्रः

अथ हस्तिशैलमधुसूदनात्मजो हरिकेशवश्च चितिसौख्यमेदूरः ।
अगमत् पदं स्वमखिलस्थिरागुरुश्शरदस्य दुर्मुखिन आदिमे दिने ।।

आचार्यः–२८

भद्राचलमहादेवः

भद्राचलाभिजनभानुसुतस्स शेष-
नार्योऽभिमण्डच पदमादिमदेशिकस्य ।
रौद्रिण्यनूर्जदशमि प्रशमीन्द्रगम्यं
प्रापत्पदं प्राणिहितेः परमामृताख्यम् ।।५७।।

आचार्यः–२९

पूर्णबोधेन्द्रः

श्रीपतेस्तनयः कृष्णः पूर्णबोधो दिने हरेः ।
ब्रह्मभूतो नभस्यच्छे संयमीश्वर ईश्वरे ।।५८।।

आचार्यः–३०

श्रीबालबोधेन्द्रः

कालहस्तिसुतबालयाभिधो बोधसद्गुरुरबोधवर्जितः ।
आप शाश्वतपदं विशुद्धमानन्दमाधवचतुर्थ्यहर्मुखे ।।५९।।

आचार्यः–३१

शीलेनिधिब्रह्मानन्दघनः

आनन्तिर्ज्येष्ठरुद्रो द्रविडिषु गरुडहृादिनीसीम्नि जातो
बोधेन्द्राचार्यशिष्यो भुवनगुरुधुरां पालयञ्छीलयुक्तः ।
कृत्स्नक्ष्मामण्डलीजिन्नृपवरललितादित्यनुत्यार्चितांघ्रिः
श्रीब्रह्मानन्दसान्द्रः प्रभवशुचिशुचिद्वादशीयाह्नि लिल्ये ।।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आचार्यः–३२

चिदानन्दघनेन्द्रसरस्वती

अण्णुशंकरनन्दनः पटुपद्मनाभसमाह्वयः
लम्बिकापथतत्परोऽप्यवलम्ब्य सद्गुरुशासनम् ।
कामकोटिपदे स्थितः श्रितकामकोटिफलप्रदे
नित्यदत्तसहस्रभक्तमभूदिदंपदभागसौ ॥६१॥

सकरुणमपबन्धुं कन्नडेशीकुमारं
पुनरपि निजराज्ये स्थापयंस्तद्विजेत्रा ।
अतिलघुतनुवृत्तिर्जीर्णपर्णात्स योगी
पदमनु चतुरोऽब्दानेव देवोऽध्यवात्सीत् ॥६२॥

प्रजोत्पत्तौ मार्गशीर्षे सितषष्ठ्यामगादसौ ।
पदं स्वं परमं सर्वशोकमोहविवर्जितम् ॥६३॥

आचार्यः–३३

श्रीसच्चिदानन्दभाषापरमेष्ठिनः

नानाभाषाभिलापी प्रशमकुलधनः प्रोढरामण्णसूनु-
स्त्रैलिंगस्तिम्मनाख्यो भुवनगुरुरभूच्चन्द्रभागाप्रतीरात् ।

काञ्च्यामेवाधिपीठं मठमपि विपुलं जीर्णमुद्धृत्य नित्यं
कामाक्ष्यर्चैकनिष्ठस्सुखमवसदसौ सच्चिदानन्दसान्द्रः ॥६४॥

खरे प्रौष्ठपदे षष्ठ्यामखरोऽधिमहालयम् ।
स सच्चिदानन्दघनो महान् लयमगाद्गुरुः ॥६५॥

आचार्यः–३४

आचार्यचन्द्रशेखरेन्द्रसरस्वती

सूनुर्वेगवतीतटोद्भवमहादेवाह्वयस्य श्रुतः
शम्भुर्नाम दवाग्निदग्धपृथुकत्राणावगाढानलः ।
आचार्यस्य निदेशतः क्षितितलं सर्वं चरन् यश्चतु-
र्वर्णान् स्वस्वपथाद्व्यधादगलितानाचार्यपीठस्थितः ॥
श्रीचन्द्रशेखरेन्द्रोऽप्यध्युष्याष्टादश स्वमठमब्दान् ।
सौम्यस्सौम्येऽन्तरधात्सहेऽतिसहनस्सुदर्शनो दर्शे ॥६७॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आचार्यः-३५

बहुरूपचित्सुखेन्द्रः

वेदाचलान्तिकभवो विमलाक्षनाम्नः
सूनुस्सुशीलकमलाक्ष इति प्रसिद्धः ।
संयम्य चित्सुखतनुः श्रितकामकोटी-
पीठाधिपत्यविभवोऽप्यवसत्स सह्ये ॥६८॥

चित्सुखानन्दयोगीन्द्रं निवेश्य निजविष्टरे ।
सर्वात्मना तिरोऽधात्स धात्वाषाढाच्छषष्ठ्यहे ॥६९॥

आचार्यः-३६

चित्सुखानन्देन्द्रसरस्वती

ख्यातस्सुरेश इति सोमगिरेस्तनूजः
क्षीरापगातटभवोऽभवदाश्रमीन्द्रः ।
श्रीचित्सुखेन्द्रचरणानुचरः प्रचार-
दूरोऽध्युवास मठमेव गुरोर्नियोगात् ॥७०॥

श्रीचित्सुखानन्दगुरुस्सच्चित्सुखमयं पदम् ।
आललम्बे हेविलम्बिन्याश्विने सितपर्वणि ॥७१॥

आचार्यः-३७

विद्याघनदेशिकः

बालचन्द्रसुतस्सूर्यनारायणसमाह्वयः ।
श्रीचिदानन्दशिष्योऽभूच्छ्रीविद्याघनदेशिकः ॥७२॥
प्रपन्नः श्रीविद्यां कथमपि स विद्याघनगुरु-
स्तुरुष्काक्रान्तेऽपि व्यधित धुरमाचार्यसहजाम् ।
इह त्रिंशद्वर्षान् प्रभवशरदः पुण्यबहुल-
द्वितीयायां प्रापत् परमुपरमं प्रौढनियमी ॥७३॥

आचार्यः-३८

धीरशंकरेन्द्रः

जज्ञे विश्वजितश्चिदम्बरभुवः श्रीमान् विशिष्टोदरात्
नाथस्यासुविनिर्गमात् परमसावव्यर्धवर्षद्वये ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वैशाखे विभवे सिते च दशमीमध्ये विवस्वानिव
स्वावासायितकुंजपुंजिततमस्काण्डार्भटीखण्डनः ॥७४॥

वैधव्यं विबुधालये निवसतिं वृत्तिं च भृत्याश्रयां
बन्धूनां च विमाननामनितरासंगां दशां चात्मनः ।
कौलीनात् कुलदूषणादपि भयादालोच्य गत्यन्तरा-
भावादध्यटवि स्तृते नवदले क्षिप्तो जनन्यैव यः ॥७५॥

यं व्याघ्रपादमहिला विरुवन्तमारा-
दादाय गेहमुपनीय निवेद्य पत्ये ।
स्तन्यादिना समपुषद्ययोपनीय
माध्यंदिनिश्च यमबूबुधदात्मविद्याः ॥

विद्याकर्म समाप्य सर्ववचसां सारार्थवित्संयम
साक्षादाप्य जगद्गुरोरथ पुरः स्वेच्छोदिताच्छंकरात् ।
तत्पार्श्वस्थितपद्मभूकरयुगप्राप्तां दधत्पादुकां
वीरां व्योमगतौ स संयमधनस्तिल्वाटवीमावसत् ॥

वेदान्तदेशिकचिदम्बरनाथवेधो-
वाक्यैर्जगद्गुरुरधिष्ठितकामपीठः ।
अष्टासु दिक्ष्वपि निरस्तसमस्तविद्व-
द्वादावलेपविभवो व्यचरद्धरित्रीम् ॥७८॥

काश्मीरिकान् लघु विजित्य गिरोद्भटादीन्
सर्वज्ञपीठमधिरुह्य च शारदाग्रे ।
आत्रेयकन्दरमनुव्रजितोऽपि शिष्यै-
रन्तर्हितस्सतनुरेव स शङ्करेन्द्रः ॥७९॥

द्वापश्चाशतमित्थमद्वयनयं वर्षान् प्रवृष्य क्षितौ
पुण्यायां परतोऽपि तस्य सुपथश्चिख्यासयेव द्रुते ।
सिद्धार्थिन्ययनेऽप्युदञ्चिनि शुचौ दर्शेऽह्नि काले कले-
विद्याशेवधिपावके (3914) गुरुरभूत्सच्चिद्विलासो मुनिः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आचार्यः–३९

सच्चिद्विलासेन्द्रसरस्वती

कान्यकुब्जकमलेश्वरात्मजः श्रीपतिः श्रितयमश्च शंकरात् ।
अध्युवास गुरुपीठमश्रमं बालवर्षधृतिशील आश्रमी ॥८१॥

आनन्दवर्धनमुखैरभिरूपवर्यै-
राराधितांघ्रिरधिपद्मपुरं चिराय ।
अध्युष्य काञ्चिमुपगम्य च नन्दनाब्दे
सिद्धिं गतो निशि नृहसिंहजयन्तिकायाः ॥८२॥

आचार्य –४०

महादेवेन्द्रसरस्वती

कर्णाटकन्नयसुतश्शिवरामभट्टः
सच्चिद्विलासयतिना सुहितः स्वपीठे ।
अध्यास्य तं रविसमो भवराधशुद्ध-
षष्टीप्रदोषविरतौ विरतः स्वधाम्नि ॥८३॥

आचार्यः–४१

गंगाधरेन्द्रसरस्वती

अप्पन्नाख्य उमेशभट्टतनयो भीमातटीसंभवः
श्रीविद्यानिरतः श्रितो गुरुपदं श्रीकामकोटीमठे ।
पञ्चत्रिंशतमध्युवास शरदः श्रीशारदापीठिकां
सौम्यस्सौम्यनभस्सुदि प्रतिपदि प्रेयाय गंगाधरः ॥८४॥

आचार्यः–४२

ब्रह्मानन्दघनेन्द्रसरस्वती

सुब्रह्मण्यभवो नियम्य नरसंभट्ठोऽथ गंगाधरात्
ब्रह्मानन्दघनाभिधोऽधित धुरां द्व्यूनास्समास्त्रिंशतम् ।
लिल्येऽधीश्वरमीश्वरोर्जबहुलाष्टम्यामसौ सङ्गवे
घुष्यन्नेव हि सूत्रभाष्यविषयानन्तेवसद्भ्यः पटुः ॥

आचार्यः–४३

आनन्दघनेन्द्रसरस्वती

श्रीतुङ्गभद्रातटभूस्सुदेवभट्टात्मजश्शङ्करपण्डिताख्यः ।
अभूदथानन्दघनश्चलाब्दैः (36) प्रमादिचैत्राच्छनवम्यहेऽगात् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आचार्यः-४४

पूर्णबोधेन्द्रसरस्वती

कर्णाटो हरिपण्डितश्शिवसुतः श्रीपूर्णबोधाख्यया
बिभ्राणोऽनुपदं जगद्गुरुपदं वर्षाश्च षड्विंशतिम् ।
धाम्नि स्वे परमे जगाम विलयं वर्षे प्रमाथ्याह्वये
कृष्णप्रौष्ठपदत्रयोदशतिथौ ब्राह्मे क्षणे ब्रह्मवित् ।८७।

आचार्यः-४५

परमशिवेन्द्रसरस्वती

श्रीकण्ठशिवसाम्बपण्डितसुतः सैकां समा विंशतिं
बिभ्रत् स्वस्य पदे निवेश्य सुकविं सूर्यात्मजं सोमकम् ।
शार्वर्याश्विनसप्तमीनिशि गतस्सिद्धिं स पक्षे सिते
संन्यासात् प्रभृति क्षितिध्रविवरस्थायी परादिशिवः ॥८८॥

आचार्यः-४६

श्रीसान्द्रानन्दबोधेन्द्राः

बोधेन्द्राख्यस्स सोमो गुरुपरमशिवेन्द्रार्यवाचाऽधिपीठं
तिष्ठन् प्राप्यान्यदेशान् पथि पथि विनतान् प्रापयन्नद्वयास्थाम् ।
श्रीधाराभोजदत्तप्रचुरमणिमयान्दोलिकाक्लृप्तयात्रः
काश्मीरामात्यपुष्यत्कटकसमवनोऽधान्मठं म्लेच्छदूरम् ॥८९॥

शरदस्त्रिशतं सप्ताप्यध्युष्या(ष्य स गुरोः परम्)न्वरुणाचलम्।
जगाम धाम परममीश्वराषाढपर्वणि ॥९०॥

आचार्यः-४७

चन्द्रशेखरेन्द्रसरस्वती

श्रीकण्ठः शुकदेवशर्मतनयः कुण्डीनदीकूलभू-
र्वाग्मी वाङ्मयतत्वसंग्रहपटुर्धृष्टो वटुर्द्राविडः ।
बोधेन्द्रार्यकृपागृहीतनियमः श्रीचन्द्रचूडाख्यया
तिष्ठन् काञ्चिमठे बभार स धुरामाचार्यकीं भूतले ॥९१॥

मंखश्रीजयदेवकृष्णसुहृल्लप्रष्ठैर्महिष्ठैर्वृतो
विद्वद्भिः परितः क्षितिं विरचयन् यात्रां विजैत्रां व्रती ।
विद्यालोलकुमारपालनृपतेस्संसत्समुत्तंसितं
हेमाचार्यमपि व्यपाकृत गिरा वागष्टकव्याकृतम् ॥९२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ध्यायंस्तारकमार्तिहारकमसौ श्रीचन्द्रचूडाश्रमी
ज्वालाभावविकारदृग्जलधिमिः (४२६७) काले कलौ कलिते ॥
आस्थायासनमष्टषष्टिशरदः श्रीपार्थिवे पार्थिवं
चैत्रे चित्तमपर्व पर्वणि जहद्देहं विदेहोऽभवत् ॥९३॥

आचार्यः–४८

अद्वैतानन्दबोधेन्द्राः

प्रेमेशस्य पिनाकिनीतटभुवस्सूनुस्स सीतापतिः
स्नात्वा सप्तदशायुराश्रममधात् श्रीचन्द्रचूडान्मुनेः ।
खण्डंखण्डमखण्ड खण्डनकृदाद्यौद्दण्डचमुच्चण्डवा-
गाचार्यस्त्रिरहिण्डताऽऽजलनिधिं विष्वक्स विश्वंभराम् ॥९४॥

वाग्वर्षैर्विशदय्य विश्वमभितोऽद्वैतं विदां सम्मतं
सिद्धार्थिन्यपि हायने शुचिदशम्यहृन श्रितश्चित्सभाम् ।
अर्चन्नेव च मुक्तिलिंगमदधादन्तः समन्ताच्छ्रुते-
ष्वासीदत्स्वपि चिद्विलासनियमी चिद्व्योम्नि साक्षादसौ ॥९५॥

आचार्यः–४९

छायावनमहादेवेन्द्रसरस्वती

छायावनाच्युतसुतो गुरुमूर्तिनामा
स्थित्वा जगद्गुरुपदे छवि (47) वर्षकालम् ।
प्राप्तोऽपराभवपदं स पराभवोर्ज-
कालाष्टमीनिशि पदं परमात्मसंज्ञम् ॥९६॥

आचार्यः–५०

जाह्नवीचन्द्रचूडेन्द्रसरस्वती

अरुणगिरितनूभूरार्यगंगेशनामा
गुरुवरपदमञ्चन् किञ्च पञ्चाशदब्दान् ।
अभजदथ स सिद्धिं दुर्मुखिज्येष्ठषष्ठी-
निशि निशितशिवार्चानिष्ठितश्चन्द्रचूडः ॥९७॥

आचार्यः–५१

श्रीविद्यातीर्थेन्द्रसरस्वती

बिल्वारण्यजशार्ङ्गपाणितनयस्सर्वज्ञविष्णुः श्रयन्
संन्यासं गुरुचन्द्रशेखरमुनेरास्थाय पीठीं गुरोः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

योगेशस्य च चक्रराजवसतेर्देव्याश्च सक्तोऽर्चने
श्रीमन्माधवबुक्कभारतियतिप्रष्ठैर्महिष्ठैर्वृतः ॥९८॥

काञ्च्यामेव स सप्तति त्रिसहितां वर्षान्विभूष्यासनं
शिष्यानष्ट दिशागजायितयतीनादिश्य पीठावने ।
यावत्पञ्चदशाब्दपूर्ति हिमवच्छृंगाश्रयश्शंकरा-
नन्दैकानुचरश्चचार परमं धीरस्तपो दुश्चरम् ॥९९॥

तपस्यन्नेवासौ तरुणतरणेर्धाम्नि परमे
निलीनोऽन्तर्हित्या निमिषति च पार्श्वे परिचरे ।
श्रितो रक्ताक्ष्यब्दे प्रतिपदि तपस्येष बहुले
श्वसन् शिष्योऽप्यार्त्या न्यवृतदसदत् स्वं च स मठम् ॥१००॥

अत्रान्तरेऽष्टापि यथानियोगं आचार्यपीठीमविरोधमावुः ।
तं शंकरानन्दमुदीक्ष्य हृष्टा देष्टुर्मठं तं निरवीविशन्त ॥१०१॥

आचार्यः–५२

शंकरानन्देन्द्रसरस्वती

आदिश्याष्ट यमीश्वरान् समवितुं कर्णाटदेशेऽद्वयं
रोध्दुं सायणमाधवोक्तविधया वृद्धिं च मध्वाध्वनाम् ।
विद्यातीर्थगुरोरसोढविरहोऽप्यावृत्य शीताचलात्
तस्योक्तेर्बिभरांबभूव स धुरां श्रीकामकोटीमठे ॥१०२॥

श्रीमध्यार्जनबालचन्द्रमखिराट्सू नुर्महेशाह्वयः
विद्यातीर्थपदान्नियम्य समयेष्वद्वैतमुद्योतयन् ।
अध्यास्त प्रतिकामकोटि शरदो द्वात्रिंशतं देहिनां
द्वैतध्वान्तनिवारणो नवमठीनाथो नवश्शंकरः ॥१०३॥

स दुर्मुखिनि सन्मुखो मधुरवाङ्मधौ मौनिराट्-
पदी प्रतिपदि प्रगे प्रसितधीस्सिते पक्षके ।
समस्तभुवनार्चितस्सकृदुमेशयन्नच्युतं
जहौ तनुमनुत्तमामविशदाशु नैजं महः ॥१०४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आचार्यः-५३

पूर्णानन्दसदाशिवेन्द्रः

नागारण्यगनागनाथतनुजः प्राप्ताश्रमश्शंकरा-
नन्दादेष सदाशिवेन्द्रनियमी नेपालभूपाञ्चितः ।
पूर्णानन्दपदेन यो भुवि पुनन् सर्वांश्च सानुग्रहं
श्रीकाञ्च्यामधिकामपीठमवसत्सैकामशीतिं समाः ॥१०५॥

पिङ्गले मङ्गलालोकः ज्येष्ठे ज्येष्ठश्शुचिश्शुचौ ।
दशम्यां दशमीमाछंद्दशां धाम्न्यपुनर्भवे ॥१०६॥

आचार्यः-५४

व्यासाचलमहादेवेन्द्रः

काञ्चीकामेश्वरार्यात् समजनि कमलाम्बोदरात् कुप्पनाख्यो
यः पूर्णानन्दयोगिप्रवरपदरतेः प्राप पीठीममुष्य ।
भाष्यं त्रिस्सप्तकृत्वश्चटुलमचकलद्यो नवाब्द्यां प्रहृष्य-
न्नक्षय्याषाढकृष्णप्रतिपदि स महादेवनामाऽऽप सिद्धिम् ॥

आचार्यः-५५

अरुणगिरिचन्द्रचूडेन्द्रः

मधुरितमणिमुक्तामुग्धतीराश्मशाला-
पुरतिलकपुरारिश्रीमतीपुण्यपुञ्जम् ।
अरुणगिरिरभार्षीदद्वयाचार्यमुद्रां
चतुरुदधिपटायां चन्द्रचूडेन्द्रनामा ॥१०८॥

इत्थं मामनुशिष्य शिष्यकणिशं तांस्तान्समस्तांस्ततः
सन्दर्श्य क्षणतस्स सिद्धिमसद द्वः षोडशाब्दं) (द्वर्षान् षडेव स्थितः
काञ्च्यां(मीनरवौ स्वभानु (आङ्गिरसे सहस्य)धवलैकादश्यहे प्रत्यु
षस्यापत् सिद्धिमनापदि प्रतिपदं सच्चित्सुखे ज्योतिषि ॥१०९॥

अयं च काञ्च्यामेव सिद्धिं गतः॥ पुण्य श्लोकः-५५.

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीजगद्गुरुश्रीकाञ्ची-
कामकोटिपीठाधीश्वरश्रीचन्द्रचूडेन्द्रपूज्यपादशिष्य
षट्पञ्चाशत्पीठेश्वरश्रीसर्वज्ञसदाशिवबोधेन्द्र-
श्रीचरणविनिर्मिता पुण्यश्लोकमंजरी
समाप्ता ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ अथ पुण्यश्लोकमञ्जरी परिशिष्टम् ॥

श्रीमदात्मबोधेन्द्रसरस्वतीविरचितः

प्रथमविभाग

आचार्यः–५६

सर्वज्ञसदाशिवबोधेन्द्र

अथोत्तरपिनाकिनीतटभवस्स बोधेश्वरः
सुतश्चिरुतचिक्कनाध्वरिवरस्य भक्तो हरेः ।
अभूत्किल जगद्गुरुर्नियमिचन्द्रचूडाज्ञया
सदाशिवपदावहश्चय (16) (चर) (26) संमाः प्रवीरार्चितः ॥१॥

स सेतुमधिजग्मिवानतिपवित्ररामेश्वरं
श्रितः पदमनश्वरं प्रतिविलंबिचैत्राष्टमि ।
दधत्परमयुक्छिवं निजपदे प्रतिष्ठापितं
शिवाय बडुले नृणां सुबहुलाय पक्षे मुनिः ॥२॥

आचार्यः–५७

परमशिवेन्द्रार्यः

पंपासरस्तटभुवः परमेश्वरस्य
पुत्रः सदाशिवरतः शिवरामकृष्णः ।
तस्मादबाप्य नियमं नियमी निरस्त-
संगोऽध्युवास सदनं खलु कामनेत्र्याः ॥३॥

श्रीचक्रपूजनरतः शिवयोगलंबी
श्रीदेशिकेन्द्रवचसा श्रितकामपीठः ।
आचार्यकं छवि (47) समं विदधावकामः
कामेश्वरीमनुपुरश्चरणैकदक्षः ॥४॥

स पार्थिवे पार्थिवदेहदूरं
नभो नभस्यच्छतमोऽच्छपक्षे ।
अवापदापद्विधुरो दशम्यां
दशम्यसौ दीनशके (1508) शकाब्दे ॥५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आचार्यः–५८

विश्वाधिकात्मबोधेन्द्रसरस्वती

वृद्धाचलप्रभवविश्वमखींद्रसूनुः
विश्वेश्वरः परशिवार्यपदं प्रपन्नः ।
आसेतुशीतगिरि कल्पितजैत्रयात्रः
आद्यात् स शङ्करगुरोः अतिहृद्य आसीत् ॥६॥

विश्वाधिकस्वधिषणत्वत एनमाहुः
विश्वाधिकेन्द्रमनघाः नवशङ्करञ्च ।
श्रीरुद्रभाष्यमुखभूरितरप्रबन्ध-
सन्धानकौशलममुष्य किमप्यमेयम् ॥७॥

द्वापञ्चाशतमुद्वहन् गुरुधुरां अब्दानवाच्यां दिशि
प्रस्थाने गरुडापगातटभुवि प्रापत् पदं शाश्वतम् ।
बोधेन्द्रार्यविसृष्टविष्टरधुरो विश्वाधिकेन्द्रस्तुला-
कृष्णाष्टम्यहनीश्वरे हृदि दधत्सोमार्धचूडामणिम् ॥८॥

आचार्यः–५९

श्रीभगवन्नामबोधेन्द्राः

श्रीविश्वाधिकदेशिकेन्द्रवचसा प्राप्तो दिशं दक्षिणां
प्राचीनांबुधिरोधसि प्रतिजगन्नाथं प्रपन्नो गृहान् ।
श्रीलक्ष्मीधरशर्मणोऽस्य तनुजात् म्लेच्छीकृतां योषितं
कुर्वाणात् द्विजसंगतां स नियमात् अध्यैष्ट भक्तेः क्रमान् ॥९॥

श्रीकाञ्चीमनुविश्य देशिकपदं संमण्ड्य तत्वोज्ज्वलैः
ग्रन्थैर्भक्तिपथं विधाय विशदं विश्वस्य मुक्त्यै कलौ ।
मूकस्यापि शिशोर्महाप्रवचनप्रावीण्यदायी मुनिः
बोधेन्द्रो जयतात् स भक्तजनताकल्लोलिनीनीरधिः ॥१०॥

श्रीमन्मण्डननाम्नि काञ्चिनगरीखेटे कृतावासतः
काण्वात् केशवपाण्डुरङ्गविबुधात् जातोऽभिजाताकृतिः ।
भक्तः श्रीपुरुषोत्तमः श्रितवतां भक्त्यध्वदर्शी महान्
अध्यास्तासनमादिशङ्करगुरोरार्यात्मबोधाज्ञया ॥११॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आचार्यत्वमुद्वह्य साधु स चतुष्पञ्चाशदब्दं मठे
पीठे कामदृशः स्थितः प्रवचनैः अद्वैतमुद्योतयन् ।
अब्धिग्लौरसचन्द्रसम्मितशके (1614) श्रीशालिवाहाह्वये
सिद्धिं प्रापदपारधैर्यजलधिः स्वस्यैव धाम्न्यद्वये ॥१२॥

प्रजोत्पत्तिप्रौष्ठपदपूर्णिमायामुपार्जुनम् ।
भगवन्नामबोधेन्द्रो बोधसाम्राज्यमीयिवान् ॥१३॥

आचार्यः–६०

अद्वयात्मप्रकाशेन्द्राः

अथ वसिष्ठनदीतटसंभवः परशुरामसुतः श्रुतिपण्डितः ।
अचकलद्गुरुराजधुरां गुरोर्वचनतो रचयन्परितोऽटनम् ॥१४॥

आत्मप्रकाशेन्द्रसमाख्ययाऽसावाचार्यकं द्वादशवर्षमार्छत् ।
गोविन्दनामा नियमी स्वभानुचैत्रद्वितीयानिशि सिद्धिमापत् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्य श्रीगोविन्दात्म-
प्रकाशेन्द्रश्रीचरणचरणकमलनिषेवणावाप्तभुवनगुरुपदः
श्रीकाञ्चीकामकोटिपीठाधीश्वरश्रीकुशस्थली-
श्रीमहादेवेन्द्रसरस्वतीश्रीचरणशिष्यः
श्रीमदात्मबोधेन्द्रविनिर्मितं पुण्यश्लोक-
मञ्जरीपरिशिष्टं समाप्तम् ॥

इति शिवम् ॥

॥ अथ पुण्यश्लोकमञ्जरी परिशिष्टम् ॥

पोलकग्रामाभिजन–शास्त्ररत्नाकर–श्रीरामशास्त्रिप्रणीतः

द्वितीयविभागः

आचार्यः–६१

श्रीमहादेवेन्द्राः

महादेवेन्द्राख्यो गुरुवर इहाचार्यपदवीं
समाश्चत्वारिंशत् द्विशरवधिकाः बिभ्रदतुलाम् ।
महायोगी साक्षात्कृतपरमहाः क्रोधनसमे
तथा ज्येष्ठे शुक्ले नवमसुतिथौ सिद्धिमभजत् ॥१॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आचार्यः-६२

श्रीचन्द्रशेखरेन्द्राः

श्रीचन्द्रशेखरेन्द्रः सप्तत्रिंशत्समाः स्थितः पीठे ।
शुभकृति पुष्ये कृष्णद्वितीयतिथ्यामियाय कैवल्यम् ॥२॥

आचार्यः-६३

महादेवेन्द्राः

महादेवेन्द्रगुरुराट् एकत्रिंशत् समाः स्थितः ।
श्रीमुखाषाढमाश्शुक्लद्वादश्यां सिद्धिमास्थितः ॥३॥

आचार्यः-६४

चन्द्रशेखरेन्द्राः

श्रीचन्द्रशेखरगुरुः श्रितचन्द्रमौलिः
त्रिंशत्समा अपिच सप्त वसन् हि पीठे ।
साधारणे शरदि कार्तिककृष्णपक्ष-
स्याद्ये तिथावुपगतः स्थिरमात्मधाम ॥४॥

आचार्यः-६५

महादेवेन्द्राः

पीठे महादेवेन्द्राख्यः त्रिंशन्नव समाः स्थितः ।
विरोधिफाल्गुनामायां गुरुः कैवल्यमास्थितः ॥

आचार्यः-६६

चन्द्रशेखरेन्द्राः

श्रीचन्द्रशेखरगुरुः समास्सप्तदश स्थितः ।
पराभवे माघकृष्णाष्टम्यां धाम निजं ययौ ॥

आचार्यः-६७

महादेवेन्द्राः

गुरुर्महादेवेन्द्राख्यः पीठस्थः सिद्धिमाययौ ।
पराभवे फाल्गुने तु शुक्लायां प्रतिपत्तिथौ ॥

पुण्यश्लोकमंजरीपरिशिष्टे द्वितीय-
विभागस्समाप्तः ॥

॥ शिवमस्तु ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri